International Journal of Sanskrit Research 2020; 6(2): 106-112

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(2): 106-112
© 2020 IJSR
www.anantaajournal.com
Received: 18-01-2020
Accepted: 22-02-2020

**के.भास्कर् नायुडु**
शोधच्छात्रः, राष्ट्रियसंस्कृतविद्यापीठम्,
तिरुपतिः, आंध्र प्रदेश, भारत

**Corresponding Author:**
**के.भास्कर् नायुडु**
शोधच्छात्रः, राष्ट्रियसंस्कृतविद्यापीठम्,
तिरुपतिः, आंध्र प्रदेश, भारत

# हितोपदेशे – शैक्षिकसामाजिकमनोवैज्ञानिकतत्त्वानि

**के.भास्कर् नायुडु**

अस्मिन् जगत् शिक्षा सांस्कृतिकदृष्टिमुद्बोधयति। शिक्षया स्वजीवनोन्नत्यै स्वजीवनयापनाय प्रशिक्षणं प्राप्यते। शिक्षा आधुनिकविषायाणां विज्ञानादीनां प्रशिक्षणं प्रशस्तं करोति। नैतिकगुणादानेन जीवनं सफलयति। अतः पण्डितनारायण हितोपदेशमाध्यमेन तात्कालिकसमाजे शिक्षायाः महत्त्वं ज्ञापयितुं प्रयत्नमकरोत्। तदीयपद्येषु कथासु च शैक्षिकविचाराः अपि उपलभ्यन्ते। तेषां विचाराणामुपयोगः साम्प्रतिकशिक्षाव्यवस्थायामपि अपेक्षितस्थलेषु कर्तुं शक्यते ।

हितोपदेशं परिशील्य अनुसन्धाता विविधशिक्षासम्बद्धानां तत्त्वानामेकत्रीकरणमकरोत्। तेषु अनुसन्धात्रा स्वीकृतानि प्रमुखानि शैक्षिकतत्त्वानि वर्तन्ते, तद्यथा-,शिक्षायाः महत्त्वम्, शिक्षायाः प्रयोजनानि, शिक्षायाः उद्देश्यानि, शिक्षणविधयः, शिक्षकः, शिक्षकस्य कर्तव्यानि, शिक्षकस्य गुणाः, शिक्षकस्य लक्षणानि, पण्डितस्य लक्षणानि, छात्रः, छात्रस्य लक्षणानि, पाठ्यक्रमः, शिक्षणसंस्थाः, सुभाषितगोष्ठ्याः शास्त्रचर्चायाश्च महत्त्वम् इत्येतानि तत्त्वानि हितोपदेशकथासु विविधप्रसङ्गेषु प्रयुक्ताः सन्ति तान्यत्र सप्रमाणम् उल्लिख्यन्ते।

संस्कृतकथासाहित्येऽस्मिन् भारतीयजीवनपरम्परा, आचारव्यवहारशिक्षा, कर्त्तव्यबोधः, धार्मिक- नैतिक- सामाजिक- तत्त्वानि च प्राप्यन्ते। प्रायः केषुचित्कथासाहित्येषु व्यक्तीनां नामानि विहाय पशुपक्षीनां जीवजन्तूनां जलचराणां नामानि संस्थाप्य, पशुपक्ष्यादीन् प्रतिनिधिरूपेण प्रदर्श्य कथाभिः सर्वान् धार्मिकनैतिक – सामाजिक – राजनैतिकेत्यादीनि तत्त्वानि प्रबोधयन्ति। इयं कथासाहित्यपरम्परा अत्यन्ता प्राचीनतमा। वेदे एव अस्य कथासाहित्यस्य समुद्भवः दरीदृश्यते। वेदादेव निसृतेयं कथासाहित्यश्रृंखला। ऋग्वेदे पशुकथायाः स्वरूपं संलक्ष्यते। उपनिषत्स्वपि जीवजन्त्वाधारितकथाभिः उपदेशः प्राप्यते। महाभारते अपि प्राणिकथासाहित्यद्वारैव जनाः

उपदिष्टाः। अत अस्य कथासाहित्यस्यारम्भः वैदिकयुगादेवेति कथने नातिशयोक्तिः। अस्यां कथासाहित्यपरम्परायां मूर्धन्याभिषिक्तं भवति इदं हितोपदेशम्।

**हितोपदेशे शैक्षिकतत्त्वानि**

**शिक्षायाः अर्थः**

शीलनिर्माणमेव शिक्षा इति। तथा च सर्वाङ्गिकविकासः, आन्तरिकशक्तीनां गुणानाञ्च विकासः एव शिक्षा इति ।

**शिक्षायाः उद्देश्यानि-**

उन्नतजीवनमार्गः,मोक्षप्राप्तिः, बौद्धिकविकासः, सद्गुणानां विकासः, ज्ञानप्राप्तिः, नैतिकतायाः विकासः, सुचरित्रनिर्माणम्, आध्यात्मिकज्ञानस्य विकासः, अनुकूलव्यवहारसम्पादनम्, अनुशासनसम्पादनम्, परोपकारीयं जीवनसम्पादनमित्यादिनि शिक्षोद्देश्यानि भवन्ति।

**विद्यायाः महत्त्वम्** -

शास्त्रज्ञैः, शिक्षितैः, विवेकयुक्तैः, विद्वद्भिश्च परिवाराय, समाजाय, राष्ट्राय च लाभः, सुखं, कल्याणञ्च प्रदीयन्ते। विदुषां सर्वत्र पूजा भवति। अपारधनस्य प्राप्तिश्च भवति इति।

**शिक्षणविधयः-**

सरलपद्धतीनां प्रयोगः। अध्यापनसमये अध्यापनविषयस्य सङ्क्षेपेण सारः प्रथमम् अवबोधितव्यः इति। फलयुक्तविद्या बोधनीया। शास्त्रार्थविधिः, कण्ठस्थीकरणं, ध्यानविधिः, प्रश्नोत्तरविधिः, अध्ययनाध्यापनपध्दतिः, तपस्याविधिः, कथाविधिः, प्रमाणविधिः, व्याख्यानविधिः, प्रयोजनाविधिः इत्येते विधयः हितोपदेशस्य कथामुखे एवं बहुकथासु च परिलक्ष्यन्ते।

**शिक्षकस्य महत्त्वम्** -

आदुनिककाले, शिक्षकः जनानां, समाजस्य च सन्तापहारीः इति। एवं दयार्द्रेन दानदाक्षिण्योदारचरितादिगुणगणोपबृंहितः भवति। अर्थात् आचार्यः ज्ञानसागरः भवति। सः विद्यावान् तपस्वी च भवति। अतः गुरुषु दया, दानम्, दाक्षिण्यम्, शीलम्, ज्ञानम्, उदारचरितमादि गुणाः विद्यन्ते।

**उत्तमशिक्षकस्य लक्षणानि** –

विविदकौशलेषु नैपुण्यसम्पादनम्, छात्राणां शास्त्रपटुता, बौद्धिकविकासः, योगक्रियानुष्ठानम्, तपः, स्वाध्यायः, वाचनकौशलयुक्तः, लेकनकौशलः, अवबोधनकौशलयुक्तः, छात्राणामनुकूलव्यवहारसम्पादनम्, छात्रेषु अनुशासनसम्पादनं, छात्राणामधिगमसम्पादनं, छात्रेषु चतुर्विधकौशलसम्पादनं, छात्राणामध्ययने रुच्युत्पादनम् इत्यादिनि प्रमुखकर्तव्यानि ।

**गुरोः परित्यागः, तिरस्कारश्च** –

अपरिपक्वलोकानां परिपक्वं सम्पादयति अध्यापकः। अध्यापकानां दायित्वं न केवलमध्यापनम्, अपि तु छात्राणां समग्रव्यक्तित्वस्य विकाससाधनम्। अतः समाजे अध्यापकस्य महत्त्वं सर्वोपरि अस्ति। परन्तु यः गुरुः स्वस्य यत् दायत्वं विद्यते तत् त्यक्तत्वा अवलिप्तः (मदोन्मत्तः), कुमार्गगामीः, कर्तव्यमाकर्तव्यमजानाति तादृशस्य परित्यागः समुचित एव।

**शिक्षकस्य गुणाः** –

परिश्रमी, परोपकारी, इन्द्रियसंयमी, अध्यापनशीलः, आत्मविश्वासी, छात्रसंसदि लब्धकीर्तिः, दृढसङ्कल्पयुक्तः, आस्तिकः, कर्त्तव्यनिष्ठः, व्यवस्थितः, सदाचारी, स्वाध्यायशीलः, अतिलोभरहितः इत्यादिगुणाः शिक्षकस्य भवेयुः।

**शिक्षकस्य कर्तव्यानि** –

कर्तव्यविशये शिक्षकैः स्वस्य वचनं तत्रैव प्रयोक्तव्यं यत्रोक्तं लभते फलम्। यथा शुक्लपटे रागः अत्यन्तं स्थायी भवति, परन्तु कृष्णपटादिषु रागः अस्थायी भवति। अतः शिक्षकैः प्रयोजनयुक्तानि, उपयुक्तानि, उद्देश्यपरकाणि, लक्ष्ययुक्तानि, च

वचनानि प्रयोक्तव्यानि न तु इतराणीति भावः। तथा च यत्र शिक्षकाः योग्यायोग्यच्छात्रेषु, विशेषनिर्विशेषच्छात्रेषु च भेदमज्ञात्वा समानं व्यवहरन्ति तत्र योग्यच्छात्राणां योग्यता, उत्साहः, क्रियाशीलता, प्रतिभा, विशिष्टता इत्यादिगुणाः परिहीयन्ते इति भावः। अतः शिक्षकैः योग्यायोग्यछात्रान्, छात्राणां स्तरं, छात्राणां सामर्थ्यं, छात्राणां क्रियाशीलत्वं, उत्साहत्वं, प्रतिभासम्पन्नत्वमित्यादिगुणान् सम्यक् ज्ञात्वा तदनुसारं कथा पद्धत्या शिक्षणं देयम् इति निश्चेतुं शक्यते। एवं सामर्थ्ययोग्यताविशिष्ठतायाश्च विकासाय प्रयत्नः विधेय भवति।

**छात्रः –**

कार्यकरी, आकाङ्क्षी, आज्ञापालकः, परिश्रमी, विद्याप्राप्त्यार्थं गृहत्यागः, आस्तिकः, आध्यात्मिकः, सुविमर्श्य सङ्कल्पयुक्तः, लक्ष्यप्राप्तेः तीव्रेच्छुः, शैक्षिकसामाजिकलोकव्यवहार- ज्ञानयुक्तः, संयमी, अनुशासितः, अनुशिष्टः, विनयी, धैर्यवान्, ध्यानमित्येते गुणाः छात्राणां भवेयुः इति विष्णुशर्मणः अभिप्रायः।

**पाठ्यक्रमः –**

द्वादशवर्षात्मकं व्याकरणम्, धर्मशास्त्राणि मन्वादीनि (मनुस्मृतिः), अर्थशास्त्राणि-चाणक्यादीनि (चाणक्यनीतिः), कामशास्त्राणि-वात्स्यायनादीनि वेदाः, वेदाङ्गानि, न्यायशास्त्रम्, धर्मशास्त्रम्, मनुस्मृतिः, अर्थशास्त्रम्, बृहस्पतिनीत्याः, शुक्रनीत्याश्च अध्यापने प्रमुखपाठ्यक्रमत्वेन इत्यादीनि, भवेयुः।

**अनुशासनम् –**

लालनात् पुत्रस्य विनाशः (दुस्स्वभावयुक्तः) भवति। अनध्ययनात् विप्रः (बालकः, ब्राह्मणः) नष्टो भवति। कुपुत्रस्य उत्पन्नेन वंशस्य नाशः भवति। दुष्टसङ्गेन (कुसङ्गत्या) शीलनाशः भवति। मैत्री (मित्रता) अविश्वासेन नष्टा भवति। अत्र पञ्चतन्त्रे कठोरानुशासनस्य समर्थनं कृतम्।

**मूल्याङ्कनम् –**

मूल्याङ्कनं प्रयोगमाध्यमेनैव भवति स्म। छात्राणामाचारव्यवहार-गतिविधि –कार्यशैली-भावनादीनां विश्लेषणं कृत्वा, एवं साक्षात्प्रश्नोत्तराणां मूल्याङ्कनं क्रियते स्म।

**विद्यालयः-**

प्राचीनकाले विद्याध्ययनार्थं विद्यामठाः, आश्रमाः, गुरुकुलानि च मुख्यरूपेण शिक्षणसंस्थाः आसन्। प्राचीनकाले छात्राः अस्मिन् देशे, देशान्तरञ्च (विदेशं प्रति) गत्वा विद्यामठेषु, आश्रमेषु, गुरुकुलेषु पठन्ति स्म। ताः शिक्षणसंस्थाः प्रशान्तवातावरणे निर्मलपरिवेशे अर्थात् वने अथवा नदीतटे अधययनं प्रचलति स्म। यतोहि तादृशवातावरणे छात्राणामधिगमे अवधानं भवितुमर्हति। अतः प्रशान्तवातावरणे विद्यालयानां स्थापनं भवेदिति सूचयति विष्णुशर्मा।

**हितोपदेशे सामाजिकतत्त्वानि**

**मनुष्यस्य कर्तव्यानि –**

सुनिशितवाक्, सद्गुणानां विकासः, अतिथिसेवा, मित्रद्रोहः नैव कर्तव्यः, मनुष्यपश्वादीनां संरक्षणम्, सहानुभूतिः, परोपकारः, नातिलोभः, वृक्षस्य संरक्षणम्, दानम्, सोत्साहं कार्यसम्पादनम्, धर्मयुक्तजीवनम्, अहिंसापालनं, सत्यवाचनम्, वसुधैवकुटुम्बकभावः, धर्मार्थकाममोक्षाणां कृते यत्नः इत्यादिनि प्रमुखकर्तव्यानि उक्तानि ।

**अर्थस्य महत्त्वम् -**

अर्थस्य महत्त्वम् विषये- संसारे न हि तादृशं कार्यं विद्यते, यत् द्रव्येण न सिध्यति। अर्थात् अर्थेन सर्वकार्याणि सिध्यन्ते इति भावः। अतः यत्नेन मतिमान् अर्थमेकं प्रसाधयेत्। संसारे यस्य समीपे अर्थः अस्ति तस्यैव मित्राणि, यस्य समीपे अर्थः तस्यैव बान्धवाश्च भवन्ति। यस्य समीपे अर्थाः सः पुरुषेषु परिगण्यते।

यस्य समीपे अर्थः सैव पण्डितः। एवं प्रकारेण समाजे अर्थस्य बहुमहत्त्वं विद्यते।

**अर्थोपार्जनमार्गाः-**

अर्थोपार्जनमार्गविषये एवमुक्तं- स चाऽर्थः पुरूषाणां षडभिरुपायैर्भवति- भिक्षया, नृपसेवया, कृषिकर्मणा, विद्योपार्जनेन, व्यवहारेण, वणिक्कर्मणा वा सर्वेषु उपायेषु वाणिज्यकर्म सर्वश्रेष्ठमत्याधिकार्थलाभश्च स्यात्।

**स्त्रीणां महत्त्वम् -**

स्त्री सृष्टेः आधारः भवति। स्त्री मातृमूर्तिः भवति। यस्य गृहे पतिव्रता, पतिप्राणा, पत्युः प्रियहिते रता भार्या भवति। स पुरुषः धन्यः भवति। एवं च यथा लोके गृहं गृहमिति कथ्यते, तत्तु न वास्तविकं गृहं भवति, वास्तविकगृहं तु गृहणी गृहमुच्यते। सोमदेवता स्त्रीणां कृते शौचं (शुद्धं) ददाति। गन्धर्वदेवता स्त्रीभ्यः मनोहरां चतुरवाणीं प्रयच्छति। अग्निदेवता स्त्रीभ्यः सर्वाङ्गेषु पवित्रतां प्रयच्छति। अतः स्त्रियः निर्दोषपूर्णाः, निष्कल्मषाः, शुद्धाश्च भवन्तीति भावः। अतः एव गृहणीहीनं गृहमरण्यसदृशमिति कथ्यते। अतः स्त्रीणां बहु महत्त्वं विद्यते

**मित्रस्य महत्त्वम् -**

सर्वेषां मनुष्यानां कृते यदा विपत्तयः आगच्छन्ति, तदा मित्रं त्यक्त्वा अन्यः कोऽपि वचनमात्रेणापि साहाय्यं नैव करोतीति भावः। अर्थात् सखा एव विपत्तिषु साहाय्यं करोति इत्यर्थः। यः मनुष्यः स्वस्य मित्राणां संख्यां वर्धयति, एवं तैः साकं कदापि अकपटं, सत्यञ्चाचरति, तेषां मित्राणां साहाय्येन सः विपत्तिषु सर्वदा विजयं प्राप्नोति। तथा च कदापि पराजितो न भवति। एवं ज्ञात्वा विवेकिना मित्रसङ्ग्रहः कार्यः। मित्रेण सह व्याजेन न वर्त्तितव्यम्।

**आत्मरक्षणम्-**

कुलस्य रक्षणार्थम् एकं त्यजेत्, ग्रामस्य रक्षणार्थं कुलं त्यजेत्, जनपदस्यार्थं ग्रामं त्यजेत्, आत्मार्थे पृथ्वीं त्यजेत्। विपत्तिनाशाय धनं रक्षेत्, दारान् रक्षेद्धनैरपि, आत्मानं सततं रक्षेद्दारैरपि धनैरपि। अर्थात् सर्वं त्यक्त्वा आत्मानं सततं रक्षेदिति भावः।

**विश्वासः –**

बलवद्भ्यः शत्रुभ्यः अपि निर्बलाः न वध्यन्ते, यदि तेषां विश्वासः नैव क्रियते चेत्। परन्तु बलिनः पुरुषाः अपि निर्बलैः वध्यन्ते, यदि निर्बलशत्रूनां विश्वासः क्रियते तर्हीति भावः। एवञ्च यस्य पुरुषस्य स्वाभावः, व्यापारः, कर्म, जातिः, कुलम्, पराक्रमश्च न ज्ञायते तस्मिन् कदापि विश्वासः न करणीयः इति। यदि मनुष्यः स्वस्य कुशलतां, सुखञ्च इच्छति तर्हि इति अस्य आशयः।

**पर्यावरणशिक्षा-**

हितोपदेशस्य कथामुखे प्रथमश्लोके देवीदेवान् नमस्कृत्य, अस्माकं जगत् संरक्षयितुं प्रार्थ्यते। अनेन वयं वक्तुं शक्नुमः भारतदेशः प्राचीनसंस्कृत्या सभ्यतायाश्च सम्पन्नः देशः वर्तते इति। अनयोः विकासे अत्रत्यस्य भौगोलिकपर्यावरणस्य महत्वपूर्णभूमिका विद्यते। भारतदेशस्य संस्कृतौ सूर्यः, वायुः, वृक्षः, भूमिः, नद्यः, नगाः इत्यादीन् दैवस्वरूपं मत्वा तान् पूजयन्तः वर्तन्ते। अस्य पूजनस्य पृष्ठे मानवस्य धार्मिकभावः विद्यते, परन्तु अयं भावः पर्यावरणजागृतेः एवं संरक्षणदृष्टेश्च चिह्नं विद्यते।

**ऐक्यम्-**

लघुशक्तिमन्तः निर्बलजनाः एकाश्रयाः भवन्ति चेत् बलवताऽपि शत्रुणा न बाध्यन्ते। यथा लघ्वी लताः एकस्थाने भवन्ति तदा प्रबलः वायुनाऽपि उत्पाटयितुं नैव शक्यते। यथा महान्, सुदृढः, बद्धमूलश्च वृक्षोऽपि यदि सः वृक्षः एकाकी स्थले उत्पन्नो भवति तर्हि सः वृक्षः अवश्यमेव वातेन हठात् उत्पाटयितुं शक्यते। ये वृक्षाः अनेकवृक्षैः मिलत्वा भवन्ति, ते वृक्षाः नैव वातेन सद्यः उत्पाट्यन्ते। यतोहि तेषां वृक्षाणाम् एकसंश्रयत्वात्, संहतत्वाच्च। एवं मनुष्यः असहायः, एकाकिनश्च भवति, यदि सः शौर्येणाऽपि भवति चेदपि शत्रवः तं जेतुं शक्नुवन्ति। तं हिंसन्ति च ततः परम्।

मनुष्याणां कृते सङ्गतिः, (सम्पर्कः) ऐक्यं च सदैव कल्याणकारी भवतः। विशेषतः स्वीयात्मीयबन्धुवर्गाणाञ्च ऐक्यता, सङ्गतिश्च हितकारी भवतः। यथा यावान् तण्डुलानामुपरि तुषः भवति, तावन्त एव तण्ड्लाः (धान्यं) उद्भवन्ति। तस्य अभावे धान्यस्य शक्तिः क्षीणा भवति, अतः तण्डुलाः नैव उद्भवन्ति।

**हतोपदेशेमनोवैज्ञानिकतत्त्वानि**

**व्यवहारः-**

आकारमुखादिसंस्थानविशेषैः, इङ्गितैः, भावविकारैः, हस्तपादादिचालनैः, नेत्रवक्रविकारैः, नेत्रारुण्यप्रसादादिभिश्च मनः मनोगतं भयादिकं ज्ञायते। तथा च यः मनुष्यः भयेन त्रस्तः सः वारं वारं वेगेन श्वासप्रश्वासं स्वीकरोति। एवञ्च सः व्याकुलदृष्ट्या वारं वारं परितः पश्यति। क्वचित् तस्य स्वास्थ्यं सम्यक न भवतीति, एतानि भयस्त्रस्तस्य पुरुषस्य चिह्नानि। इत्यादिनां चिह्नानामाधारेण व्यवहारेण च तस्य स्वास्थ्यं ज्ञातुं शक्यते इति।

**बुद्धेः महत्त्वम् –**

न शस्त्रैः, न नागेन्द्रैः, न हयैः, न पदातिभिश्च कार्यं संसिद्धिमभ्येति यथा बुद्ध्या कृतस्य कार्यस्य सिद्धिर्भवति। अर्थात् शस्त्रैः, नागेन्द्रैः, हयैः, पदातिभिश्च तथा नैव कार्यस्य संसिद्धर्भति, यथा बुद्ध्या कृतं कार्यस्य सिद्धिर्भवतीति। यस्य पुरुषस्य समीपे बुद्धिः अस्ति, स एव बलवान् पुरुषः अस्ति। यस्य समीपे बुद्धिः नास्ति, सः निर्बलः एव अस्ति। अर्थात् बुद्धिहीनपुरुषेषु बलं न भवति इत्यर्थः।

**बुद्धिमतः पुरुषस्य लक्षणानि-**

कथितः विषयः पशुनापि गृह्यते। कथितविषयं गृहित्वा एव अश्वाः, हस्तिनोऽपि च नोदिताः सन्तः (प्रेरिताः सन्तः) भारं वहन्ति। परन्तु बुद्धिमान् पुरुषः, पण्डितश्च अनुक्तमपि वस्तु ऊहति, विजानाति, तर्कयति च। एवं परस्य यदिङ्गितं तस्य ज्ञानमेव फलं बुद्धयेत्यर्थः। तथा च साधनोपायहीना अपि पण्डिताः, परिनिष्ठितसद्बुद्धयः, व्यवहारकुशलाः, श्रुतसम्पन्नाश्च कठिनातिकठिनकार्याणि अपि साधयन्ति। यथा काकाखुमृगकूर्माः सधितवन्तः। एवञ्च हितेपदेशस्य मित्रसम्प्राप्तिनामके द्वितीये तन्त्रे काककूर्ममृगमूषककथायां काकमृगमूषकाणां परस्पर चर्चायां चित्राङ्गेन बुद्धिमतां लक्षणं आह- चित्तोत्साहः कार्यस्य सिद्धिमसिद्धिं वा कथयति परन्तु तत् प्राज्ञः वेत्ति नेतरः इति।

**बुद्धेः प्रकाराः-**

एकबुद्धिः, शतबुद्धिः, सहस्त्रबुद्धिः, इति हितोपदेशे बुद्धेः प्रकारत्रयं नारायणपण्डितः उक्तम्।

**बुद्धेः वैयक्तिकविषमता –**

नित्यशः लाला स्त्रवति, वदनं दंशनैर्हीनं बालेषु, वृद्धेषु च विशेषतः मतिः नैव स्फुरति (न प्रसरति) इति। अर्थात् वैयक्तिकविषमतायां बुद्धिः प्रधानं कारणमस्तीति। बुद्धिभेदेन प्राणिनः भिन्नाः सन्तीति सर्वविदितमेव।

**परिवेशस्य प्रभावः-**

सन्तप्तलोहखण्डादौ संस्थितस्य (संस्थापितस्य वा) जलस्य नामापि न ज्ञायते। तदेव जलं कमलनीदलगतं सत् मुक्ताकारतया राजते (शोभते)। तदेव जलं समुद्रस्थशुक्तिकोटरे स्वातिनक्षत्रे पतितं चेत् तन्मुक्ताकारतया परिणमतीत्यर्थः। एवं सम्पर्कविशेषान्नरः उत्तमः, मध्यमोऽधम वा जायते। परिवेशस्य प्रभावात् उत्तमः, मध्यमः, अधमश्च भवतीति भावः।

**आनुवंशिकता-**

यथा वने मृगमांसभक्षकसिंहः बुभुक्षिताः सन्तः तृणं नैव चरन्ति। अर्थात् वंशपरम्परातः मांसमैव भक्षयन्ति। तद्वत् उत्तमकुले प्राप्तजन्मा मनुष्यः व्यसानाभिभूतोऽपि (विपत्तिषु) स्वस्य वंशपारम्पर्यसंस्कारान्, स्वस्य उत्तमाचारान्, नीतिमार्गान्, न्यायमार्गान्, धर्मञ्च न कदापि त्यजति (परिलङ्घयति) इति। अर्थात् कुलस्य (वंशस्य) प्रभावः भवत्येव। आयुः, कर्मः, धनम्, विद्या,

मृत्युश्च पञ्चैतानि यदा मनुष्यः गर्भस्थो प्राप्नोति। तदानीमेव निर्धार्यन्ते इत्यर्थः।

**अभिप्रेरणा**

पुण्यपापे निरपेक्ष्य बुभुक्षितः मनुष्यः सर्वकार्याणि कर्तुं शक्नोति। अर्थात् यदि तत्पापं वा पुण्यं भवतु। क्षीणाः मनुष्याः दयाविहीनाः, निष्करुणा च भवन्ति। जीवः सर्वदा असमतौल्यपरिस्थितौ भवति। एतत्परिस्थितेः कारणं तु जीवस्य अपेक्षाः (Needs) भवन्ति। अधिगमः संपादनीयश्चेत् अपेक्षाः पूरणीयाः भवन्ति। तथा च शारीरिकापेक्षाः {Psysiological needs} - क्षुत्पिपासा, उच्छ्वासनिश्वासनिद्राकामादयः शरीरापेक्षाः भवन्ति। एतासाम् अपेक्षाणां परिपूर्तिः अनिवार्या भवति। नो चेत् यथाकथञ्चित् तत्पूर्तये जनः अभिप्रेरितः भवति।

**संवेगानां नियन्त्रणम् –**

न केवलं शारीरिकदृष्ट्या स्वस्थः अपि तु मानसिकदृष्ट्या अपि स्वस्थः एव स्वस्थः इति स्वीक्रियते। संवेगानां नियन्त्रणं (Control of Emotions) मानसिकस्वस्थ्यान्तर्गतत्वेन आगच्छति। स्वस्थस्य पुरुषस्य शरीरं, मनः अपि शोभनरूपेण कार्यं संपादयतः। मनसो निरोधे कृते सर्वेन्द्रियाणि स्वतः एव निरुद्धानि भवन्ति। यथा मेघैः रवौ आच्छादिते सति समस्तरविकिरणाः आच्छन्नाः भवन्ति। वाञ्छाविच्छेदनम् (आशात्यागः) स्वास्थ्यस्य मूलकारकमिति शान्ताः, (वशीकृतेन्द्रियग्रामाः) महापुरुषाः, महर्षयश्च ब्रुवन्ति। वाञ्छा अर्थैः न कदापि निवर्त्तते, यथा वह्निना न कदापि पिपासाशान्तिर्भवति।

**भीतस्य लक्षणानि-**

भयेन सन्त्रस्तमनसां हस्तपादादिकाः क्रियाः स्तम्भनं भवति। एवं भीतस्य वाणी नैव सम्प्रवर्त्तते, वेपथुः (कम्पः) अपि अधिकः भवति। अतः एतादृशानि लक्षणानि दृष्ट्वा भीतप्राणी इति ज्ञातव्यम्।

**चिन्ता-**

यः अनागतवर्तीं, असम्भावनीयां च चिन्तां करोति। सः दुर्बलो भूत्वा शेते यथा सोमशर्मपिता। अर्थात् असम्भाव्यां चिन्ता नैव करणीया इत्यर्थः।

**अचेतनस्तरः –**

इदमचैतन्यम् अदृश्यमानं परमतिमहत्त्वपूर्णं भवति। अस्मिन् अचैतन्यमनसि अपूरिताः आशाः, अवरुद्धाः भावाश्च निहिताः भवन्ति। अत्र वर्तमानाः भावाः स्वयं बहिः प्रकाशयितुं न शक्यन्ते। परम् अत्र वर्तमानाः भावाः बहिः प्राकाशनार्थं सर्वदा यतमानाः भवन्ति। अवकाशे प्राप्ते सति परोक्षेण बहिर्भूतास्सन्तः मानवीयव्यक्तित्वं प्रभावयन्ति। एवं मानवीयः सर्वोऽपि व्यवहारः अचैतन्यमनसा एव प्रेरितः प्रभावितश्च भवतीति मनोविश्लेषणवादिनामभिप्रायः भवति। अयं विषयः ईसापूर्वं 200 शताब्यात् पूर्वं नारायणपण्डितविरचिते हितोपदेशेऽपि दृश्यते। मनुष्यः दिवसे यस्य वस्तुनः इच्छां करोति, वा यं कमपि पश्यति, वा यत्किमपि कार्यं करोति, स्वप्नेऽपि तथैव हृदि संस्थितमाशावाञ्छादि तदभ्यासाद् ब्रूते वा करोति च इति। तथा च मनुष्याणां मनसि शुभं वा अशुभं यद् संस्थितं भवति। तद् यदि रहस्यगूढमपि स्वप्नवाक्यात् तथा मदात् च मुखात् ज्ञायते एव।

**मानसिकशारीरिकस्वास्थ्यप्राप्तेः उपायाश्च –**

मनुष्याः सुखाऽशया धनस्य, सम्पत्तेः, पुत्रस्य, कलत्रस्य च कृते प्रयत्नं कुर्वन्ति, ते तु दुःखमाप्नुवन्तीति। एवं च सर्पाः पवनं पिबन्ति, न च दुर्बलाः भवन्ति, परन्तु परिपुष्टाः भवन्ति। एवं शुष्कतृणानि भुक्तत्वा वनगजाः बलिनो भवन्ति। कन्दफलानि भुक्तत्वा ऋषिमुनिवराः वनेषु कालमानन्देन गमयन्ति। अतः मनुष्यस्य सन्तोषः एव परं गुप्तं धनं भवति। सन्तोषेणैव मनुष्याः सुखिनाः भवन्ति। तद् सुखमेव सुमानसिकस्वास्थ्यस्य चिह्नं भवति। सन्तोषरूपि अमृतेन सन्तृप्तानां, शान्तचित्तमनुष्याणाञ्च कृते यत् सुखं प्राप्यते। तादृशं सुखं धनलुब्धकानां, धनस्य कृते इतस्ततः

धावताञ्च कृते कुतः लभ्यते ?। अर्थात् तादृशं सुखं नैव लभ्यते इत्यर्थः। ये सन्तोषं अमृतमिव पिबन्ति, ते परं सुखशान्तिश्च प्राप्नुवन्ति।

ये असन्तोषिनाः ते निरन्तरं दुखं प्राप्नुवन्ति।मनसो निरोधे कृते सर्वेन्द्रियाणि स्वतः एव निरुद्धानि भवन्ति। यथा मेघैः रवौ आच्छादिते सति समस्तरविकिरणाः आच्छन्नाः भवन्ति। वाञ्छाविच्छेदनम् (आशात्यागः) मानसिकस्वास्थ्यस्य मूलकारकमिति शान्ताः, (वशीकृतेन्द्रियग्रामाः) महापुरुषाः, महर्षयश्च ब्रुवन्ति। वाञ्चा अर्थैः न कदापि निवर्त्तते, यथा वह्निना न कदापि पिपासाशान्तिर्भवतीति।

**समायोजनम् –**

परिवर्तनशीलपरिस्थितौ, वा नूतनपरिस्थितौ परिस्थत्यानुसारं सम्यक् कालयापनमेव समायोजनम्। परिवर्तनशीलपरिस्थितौ, वा नूतनपरिस्थितौ परिस्थत्यानुसारं कुशलतया कालयापने असमर्थतायां असामञ्जष्यता (असमायोजनम्) उत्पन्ना भवति। संवेगानां असन्तुलत्वे असामञ्जष्यता उत्पन्ना भवति। सामञ्जष्यस्थापने असमर्थतायां (असामञ्जष्यतायां) भग्नाशां प्राप्नोति। भग्नाशा स्थितेः उत्पन्नस्य बाह्यान्तरिककारकाणि भवन्ति। यथा शारीरिकदोषाः, नैतिकादर्शाः, सामाजिककारकाणि, आर्थिककारणानि इत्यादीनि भवन्ति।

संवेगानां सन्तुलता सम्पादनार्थं - मनसो निरोधे कृते सर्वेन्द्रियाणि स्वतः एव निरुद्धानि भवन्ति, वाञ्छाविच्छेदनम् (आशात्यागः), दमनम्, विभिन्नोपायानाम् अन्वेषणम्, मार्गान्तरणम्, उचितनिर्णयं स्वीकरणम्, पृथकीकरणम्, निर्भरता, सामञ्जष्यता, प्रक्षेपणम्, दिवास्वप्नम् इत्यादीनि रक्षणतन्त्राणि उक्तानि। तथा च समाजे कथं व्यवहर्तव्यं, किं चिन्तनीयम्, कथं स्थातव्यं कस्मिन् समये किं करणीयमित्यादयः विषयाः हितोपदेशेण ज्ञायन्ते।

**परिशीलितग्रन्थाः -**


1. 1.चौखम्बा सुरभारती प्रकाशनम् वाराणसी अभिनवराजलक्ष्मी संस्कृतहिन्दीटीका नारायणपण्डित हितोपदेशः. **ISBN: 978-93-81484-81-4**
2. भारतीय बुक् कार्पोरेषन् दिल्लि पि. पेटर्सन् इग्लिष्, संस्कृतटीका नारायणपण्डित हितोपदेशः, 1999, **ISBN: 81-85122-25-3**
3. नीता प्रकाशन नई दिल्ळी श्रीमती शान्ति देवी गुप्ता संस्कृतहिन्दीटीका संस्कृत-कथाः, 2007. **ISBN: 81-7202-661-7.**
4. एस्. वि. वोरीयन्टल् रीसर्चसेन्टर्, एस्. वि.यूनिवर्सिटि, तिरुपति, बि.राघवाचार्यूलु संस्कृततेलुगुटीका, 2006.
5. दिल्ळी-संस्कृत-अकादमी प्रकाशनम् दिल्ली श्रीकृष्ण सेमवालः संसकृतलघुकथाचयः, 2008-09.